संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ।
रुद्रः सभार्य्यः स्कन्दश्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ।
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ॥
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ।
ततः पूज्यो निकुम्भोऽपि समाषैस्तिलतण्डुलैः ॥
सुगन्धिभिर्घृतोपेतैः शष्कुलीभिश्च भूरिभिः ।
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ॥
वह्निपार्श्वगतैर्नेया दृष्टा क्रीड़ाः पृथग्विधाः” ॥ * ॥
लिङ्गपुराणे यथा.—
“आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतं स्थिरम् ।
सुगन्धिर्निशि सद्वेशश्चाक्षैर्जागरणञ्चरेत् ॥
निशीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीड़ां करोति यः ॥
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्च्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदश्नो भवेत्” ॥
इति तिथ्यादितत्त्वम् ॥ (अत्र निशायां बन्धुभिरक्षैः क्रीड़यित्वा लक्ष्मीप्रसादात् धनभाग्भवेत् । अक्ष-क्रीड़ानियमश्च चतुरङ्गशब्दे द्रष्टव्यः ॥)

कोटः, पुं, (कुट्यते प्रताप्यते शत्रुरत्र अनेन वा । दुर्गमाश्रित्य प्रबलविपक्षमपि प्रतापयितुं शक्यते इत्यर्थः । कुट प्रतापने + अधिकरणे करणे वा घञ् ।) दुर्गम् । इति कुटशब्दार्थे मेदिनी ॥ गड़ कोट्टा इति च भाषा ॥ (कुट् + भावे घञ् । कौटिल्यम् प्रतापनम् ॥)

कोटकः, पुं, (कुट् + कर्त्तरि ण्वुल् ।) गृहकारकः । घरामि इति भाषा । स तु कुम्भकार्य्यां गर्भे अट्टालिकाकारस्यौरसजातः । इति ब्रह्मवैवर्त्त पुराणम् ॥

कोटरं, क्ली पु, (कोटं कौटिल्याकारं स्थानं गर्त्तमिति यावत् । रातीति । रा + कः ।) वृक्षस्थितगह्वरम् । गाछेर खोंड़ल इति भाषा ॥ तत्पर्य्यायः । निष्कुहः २ । इत्यमरः । २ । ४ । १३ ॥ निर्गूढ़ः ३ कोटरः ४ । इति शब्दरत्नावली ॥ प्रान्तरम् ५ । तरुविवरम् ६ । इति जटाधरः ॥ (कोटशब्दात् चतुरर्थ्यां अश्मरादित्वात् रः । पा, ४ । २ । ८० ॥ दुर्गसन्निहितदेशादौ, त्रि ॥)

कोटरावणा, स्त्री, (कोटरान्वितानां तरूणां वनम् । पूर्व्वदीर्घत्वं णत्वञ्च ।) सकोटरवृक्षयुक्तवनम् । इति मुग्धबोधटीकायां दुर्गादासः ॥

कोटरी, स्त्री, (कोटं कौटिल्यं रीणाति गच्छतीति । रीगतौ + क्विप् ।) नग्ना स्त्री । इत्यमरः । २ । ६ । १७ । (कोटं कुटिलस्वभावं राक्षसासुरादिकं रीणाति हन्ति । री + क्विप् ।) चण्डिका ॥ इत्यमरटीका ॥

कोटवी, स्त्री, (कोटं कौटिल्यं निर्लज्जतां वाति गच्छतीति । कोट + वा गमनहिंसयोः “आतोऽनुपसर्गे कः” । ३ । २ । ३ । इति कः । ततो गौरादित्वात् ङीष् ।) विवस्त्रा स्त्री । इत्यमरटीका । (कोटं दुर्गं दुर्गनामानमसुरं वाति नाशयतीति ।) दुर्गा । इति धरणी ॥

कोटिः, स्त्री, (कोट्यते छिद्यतेऽनया । कुट छेदे । “सर्व्वधातुभ्य इन्” । उणां । ४ । ११७ । इति इन् । बाहुलकात् गुणः ।) अस्त्रादेः कोणः । (यथा, रघुवंशे । ७ । ४६ ।
“हतान्यपि श्येननखाग्रकोटि
व्यासक्तकेशानि चिरेण पेतुः” ॥)
उत्कर्षः । शतलक्षसङ्ख्या । क्रोर इति भाषा ॥ (यदुक्तं अङ्कशास्त्रे ।
“एकं दशं शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्व्वुदमेव च” ॥)
धनुरग्रम् । इत्यमरमेदिनीकरौ ॥
(यथा, महाभारते । १ । ४० । २२ ।
“तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासृजत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत” ॥)
(रेखा । यथा, कुमारे । २ । २६ ।
“आवर्ज्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः” ॥
वादविचारः । संशयनिर्णयाय पूर्व्वपक्षः । यथा, गादाधरीसंशयहेतूक्तिः ।
“विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः” ।
लीलावत्युक्तत्रिकोणादिक्षेत्रावयवरेखाभेदः । यथा,
“इष्टाद्बाहोर्यःस्यात् तत्स्पर्द्धिन्यां दिशीतरोबाहुः ।
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः” ॥
सिद्धान्तशिरोमण्युक्तराशिचक्रस्य तृतीयांशः । यथा,
“त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्यादयुग्युग्मसंज्ञा च तेषां । अयुग्मे पदे यातमेष्यन्तु युग्मे भुजबाहुहीनं त्रिभं कोटिरुक्ता” ॥ छायानिरूपणार्थं कल्प्यमानक्षेत्रावयवरेखाविशेषः । यथा, सिद्धान्तशिरोमणौ ।
“दिक्सूत्रसम्पातगतस्य शङ्को-
श्छायाग्रपूर्व्वापरसूत्रमध्यम् ।
दोर्दोः प्रभा वर्गवियोगमूलं
कोटिर्नरात् प्रागपरा ततः स्यात्” ॥ * ॥
“दिक्सम्पातस्थस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्व्वापरसूत्रस्य च यदन्तरं स दोरित्युच्यते । दोश्छाययोर्वर्गान्तरपदं पूर्व्वपरा कोटिः” । इति ॥
चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं क्षेत्रावयवविशेषः । यथा, तत्रैव “योऽधो नरो दिनकृतः स विधोरुदयशङ्कन्वितो मम मता खलु सैव कोटिः” ॥ अपि च अर्कस्य योऽसौ अधः शङ्कुः यस्य ऊर्द्ध्वशङ्कुना युक्तश्चेत् तर्ह्येव कोटिर्मतेति । यथा, तत्रैव ।
“यो रवेरधः शङ्कुरसौ विधोरूर्द्ध्वशङ्कुना युतः । सैव कोटिर्मम मता । अत्रोपपत्तिः । इष्टार्केन्द्वोर्याम्योत्तरभावेन यदन्तरं स भुजः । ऊर्द्ध्वाधोभावेन यदन्तरं सा कोटिः । सा चैव भवति । उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदारविशङ्कोरभावात् शशिशङ्कुरेव कोटिः । यदा निशि रवेरधः शङ्कुस्तदा स शङ्कुर्विधोरुदयशङ्कुना युतो यावांस्तावत् तयोर्यष्ट्योः ऊर्द्ध्वाधरमन्तरं सैव कोटिरुचिता । यतो द्रष्टा पुरुषेणात्मनोऽवस्थानवशेन शशिनः शृङ्गमुन्नतमवलोक्यम् । अतः स्वावस्थानसमसूत्रादूर्द्ध्वरूपिण्या कोट्या भवितव्यम् । भुजकोटिकर्णोत्पन्नं त्र्यस्रं दृष्टेरग्रत आदर्शवत् सम्मुखं यथा भवति तथा कल्प्यम् ॥ किञ्च, उदयास्तसूत्रकल्पितक्षेत्रादयवविशेषः । तत्रैव यथा,—
“सूत्राद्दिवा शङ्कुतलं यमांशं
याम्यां गतं हि द्युनिशं कुगोर्द्धे ।
अधश्च सौम्यां निशि सौम्यमस्मात्
सद्युक्तियुक्तं त्वतलं निरुक्तम् ॥
सौम्याग्रकाग्रामृतलं हि याम्यं
याम्याग्रकायात् पुनरेव याम्यम् ।
तदन्तरैक्यं समवृत्तखेट-
मध्यांशजीवां भुवि बाहुभाहुः ।
दृग्ज्यां श्रुतिं चाथ तयोस्तु कोटिं
पूर्व्वापरां वर्गवियोगमूलम्” ॥
“क्षितिजस्याहोरात्रवृत्तसम्पातयोर्बद्धं सूत्रमुदयास्तसूत्रम् । यस्स्थानात् याम्यः शङ्कुः तस्य तलं उदयास्तसूत्रात् दक्षिणतो भवति । यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम् । अधस्तु उत्तरतो गतम् । अतो निशि उत्तरं त्वतलम् । अथ भुज उच्यते । उत्तरगोलेऽग्रोत्तरं त्वतलं याम्यम् । अतस्तेनोनाग्रा बाहुर्भवति । बाहुर्नामशङ्कुः प्राचि अपरसूत्रयोरन्तरम् । यदाऽग्रा शङ्कुतलादूना तदा तयोरन्तरं दक्षिणं शङ्कुतलं बाहुः स्यात् । एवं समवृत्तप्रवेशादुपरि दक्षिणगोले तु अग्रा याम्या शङ्कुतलं च याम्यं तयोर्योगे कृते बाहुः स्यात् रविसममण्डलयोरन्तरांशानां ज्या बाहुः । तत्र या दृग्ज्या स कर्णः । तयोर्वर्गान्तरपदं पूर्व्वापरा कोटिः” ॥)
एक्का । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥

कोटिकः, पुं, (कोट्या बहुसङ्ख्यया कायति प्रकाशते । कै + कः ।) इन्द्रगोपनामकीटः । इति जटाधरः ॥

कोटिजित्, पुं, (कोटिं पण्डितानां समूहं विचारणे कोटिपरिमितं द्रव्य वा जितवान् । कोटि + जि + क्विप् तुगागमश्च ।) कालिदासः । इति त्रिकाण्डशेषः ॥ (मेधारुद्रः । इति शब्दार्थचिन्तामणिः ॥)

कोटिपात्रः, पुं, (कोटिरग्रभागः पात्रं पत्राकारमस्य । यद्वा, कोटिरग्रं पात्रे जलांशोऽस्य जलक्षेपणादिति भावः ।) केनिपातकः । इति हेमचन्द्रः ॥ केरोयाल इति भाषा ॥

कोटिरः, पुं, (कोटिं असङ्ख्यं राति ददातीति । रा + कः ।) इन्द्रः । नकुलः । शक्रगोपककीटः । इति मेदिनी ॥

कोटिवर्षं, क्ली, (कोटिसङ्ख्यकानि वर्षाणि उपस्थितान् शत्रून् प्रति वर्षत्यत्र । कोटि + वृष् + अप् ।) बाणपुरम् । इति शब्दरत्नावली ॥

कोटिवर्षा, स्त्री, (कोटिभिरग्रभागैर्वर्षति मधु कोटि + वृष् + अच् । स्त्रियां टाप् ।) एक्का । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥